# શ્રીયમુનાષ્ટકમ્ ૨

shrIyamunAShTakam 2

sanskritdocuments.org

March 17, 2018

# shrIyamunAShTakam 2

# શ્રીયમુનાષ્ટકમ્ ૨

## Sanskrit Document Information

Text title : yamunAShTakam 2

File name : yamunAShTakam2.itx

Category : devii, nadI, puShTimArgIya, aShTaka

Location : doc_devii

Author : devakInandanajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# શ્રીયમુનાષ્ટકમ્ ૨

યા ગોકુલાગમનસમ્ભ્રમદત્તમાર્ગા
કૃષ્ણાય શૌરિમુદકૈરવિભાવયન્તી ।
સ્રષ્ટું તદઙ્ઘ્રિકમલેઽભવદુત્તરઙ્ગા
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૧॥

યા નન્દસૂનુમુરલીરવલીલયોદ્યદ્-
ભાવપ્રભાવગલદશ્રુપરાગમઙ્ઘ્રિમ્ ।
ઉન્મીલિતાબ્જનયનાઽસ્પૃશદૂર્મિદોર્ભિઃ
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૨॥

યા ગોકુલેશમુષિતાંશુકલજ્જિતાન્ત-
રાકણ્ઠમગ્નનવનન્દકુમારિકાણામ્ ।
કમ્પોદ્ગમં વિદધતી ન વિલમ્બમૈચ્છત્
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૩॥

યા રાધિકાઽધરપયોધરકામુકાય
તસ્મૈ નિકુઞ્ચનિલયં સ્વકરૈશ્ચકાર ।
સ્વચ્છોચિતાતિમૃદુવાલુકભૂવિતાનં
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૪॥

યા રાસકેલિજનિતશ્રમહારિવારિ-
ક્રીડાસુ ઘોષવનિતોચ્છલદમ્બુરાશિઃ ।
નન્દાત્મજં સુખયતિ સ્મ કૃતાભિષેકં
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૫॥

યા ચઞ્ચદઞ્ચલદૃશઃ સભયં વ્રજસ્ત્રીઃ
પીનોન્નતસ્તનતટીઃ પરિરભ્ય મન્દમ્ ।
પારે નયન્તમુપલક્ષ્ય હરિં સમાસીત્
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૬॥

યા વિભ્રમદ્ભ્રમરપઙ્ક્તિતદઙ્ગસઙ્ગ-
લગ્નાઙ્ગરાગરુચિરદ્યુતિદામનેત્રી ।
તત્પાદપઙ્કજરજોપચિતાઙ્ગદાત્રી
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૭॥

યા સેવિતાઽનિશમશેષજનૈર્વ્રજેશ-
પાદામ્બુજેઽતિરતિમાશુ દદાતિ તેભ્યઃ ।
સંસ્તૂયતે શિવવિરઞ્ચિમુનીન્દ્રવર્યૈઃ
સા મન્મનોરથશતં યમુના વિધત્તામ્ ॥ ૮॥

ઉક્તં મયાઽષ્ટકમિદં તવ સૂરસૂતે
યઃ સાદરં ત્વયિ મનઃ પ્રપઠેન્નિધાય ।
તસ્યાચલા વ્રજપતૌ રતિરાવિરાસ્તાં
નિત્યં પ્રસીદ મયિ દેવકિનન્દનેઽપિ ॥ ૯॥

ઇતિ શ્રીદેવકીનન્દનકૃતં યમુનાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIyamunAShTakam 2*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*